जान् स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृत-रम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत्" भाग० ५स्क० २८अ० १९ श्लो० तत्पुत्रकुरुराज्यत्वेन ७उत्तरकुरुनामके तद्वर्षे च। तत्प्रमाणञ्च उत्तरकुरुशब्दे १०९४पृ०दर्शितम्। पुराणसर्वस्वे विष्णुपु०"नाभिश्च प्रथमं वर्षं ततः किंपुरुषं स्थितम्। हरिवर्षं तथैवान्यत् मेरोर्दक्षिणतः स्थितम्। रम्यकञ्चोत्तरं वर्षं तथैवानु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। इलावृतञ्च तन्मध्ये सौवर्णो मेरुत्तमः" इति। अतस्तत्पुत्रनवकनाम्ना नवानां वर्षाणां ख्यातिरिति। तत्सन्निवेशादिकं तत्रैवोक्तं यथा

"भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। अतीत्योत्तरमम्भोधिं समभ्येति महामुने!। वङ्क्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथा चालकनन्दापि दक्षिणेनेत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने। आनीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पत्राणि लोकपद्मस्य मर्य्यादाश्चैव बाह्यतः। जठरो देवकूटश्च मर्य्यादापर्व्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथापूर्व्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्षपर्व्वतौ। पूर्व्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ। इत्येते मुनिवर्य्योक्ता मर्य्यादापर्व्वतास्तव। जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्द्दिशम्। मेरोश्चतुर्द्दिशं ये तु प्रोक्ताः केशरपर्वताः। शीतान्ताद्या मुने! तेषामतीव हि मनोरमाः। शैलानामन्तरद्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम!। तान्यायतनरम्याणि जुष्टानि वरकिन्नरैः। गन्धर्व्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। भौमा ह्येते स्मृताः स्वर्गा धर्म्मिणामालया मुने!। नैतेषु पापकर्म्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुरास्ते हयशिरा द्विज!। वराहः केतुमाले तु भारते कूर्म्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः। विश्वरूपेण सर्वत्र सर्व्वः सर्व्वेश्वरो हरिः। सर्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने!। न तेषु शोको नोत्साहो नोद्वेगः क्षुद्भयादिकम्। सुस्थाः प्रजा निरातङ्काः सर्व्वदुःखविवर्जिताः। दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः। न तेषु वर्षवर्य्येषु भौमान्यम्भांसि तेषु वै। कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना। सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः। नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम!"। विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः" किरा० दयत्ताद्रिकर्त्तरि त्रि० कुरुश्रवणशब्दे उदा०। [मूलके (मूलो) शब्दमाला।

**कुरुकन्दक** पुंन० कुरव इव विस्तीर्णः कन्दोऽस्य कप्।

**कुरुकुल्ला** स्त्री श्यामाशक्तिभेदे "काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी" श्यामाकवचम्

**कुरुक्षेत्र** न० कुरुणा चन्द्रवंश्यन्टपभेदेन कृष्टं क्षेत्रम्, कुरुदेशान्तरगतं वा क्षेत्रम् शाक० मध्यपदलोपः। तीर्थभेदे तद्विवृतिः भा० शल्य० ५३अ०

"ऋषय ऊचुः। प्रजापतेरुत्तरवेदिरुच्यते सनातनी राम! समन्तपञ्चकम्। समीजिरे तत्र पुरा दिवौकसो वरेण सत्रेण महावरप्रदाः। पुरा च राजर्षिवरेण धीमता बहूनि वर्षाण्यमितेन तेजसा। प्रकृष्टमेतत् कुरुणा महात्मना ततः कुरुक्षेत्रमितीह पप्रथे। राम उवाच। किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना। एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः!। ऋषय ऊचुः। पुरा किल कुरुं नाम कर्षन्तं सततोत्थितम्। अभ्येत्य शक्रस्त्रिदिवात् पर्य्यपृच्छत कारणम्। इन्द्र उवाच। किमिदं वर्त्तसे राजन्! प्रयत्नेन परेण च। राजर्षे! किमभिप्रेतं येनेयं कृष्यते क्षितिः। कुरुरुवाच। इह ये पुरुषाः क्षेत्रे मरिष्यन्ति शतक्रतो!। ते गमिष्यन्ति सुकृतान् लोकान् पापविवर्ज्जितान्। अवहस्य ततः शक्रो जगाम त्रिदिवं पुनः। राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुन्धराम्। आगम्यागम्य चैवैनं भूयो भूयोऽवहस्य च। शतक्रतुरनिर्विण्णः पृष्ट्वा पृष्ट्वा जगाम ह। यदा तु तपसोग्रेण चकर्ष वसुधां न्टपः। ततः शक्रोऽब्रवीद्देवान् राजर्षेर्यच्चिकीर्षितम्। एतच्छ्रुत्वाऽब्रुवन्देवाः सहस्राक्षमिदं वचः। वरेण च्छन्द्यतां शक्र! राजर्षिर्यदि शक्यते। यदि ह्यत्र प्रमीता वै स्वर्गं गच्छन्ति मानवाः। अस्मानन्निष्ट्वा क्रतुभिर्भागो नो न भविष्यति। आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत्। अलं खेदेन भवतः क्रियतां वचनं मम। मानवा ये निराहारा देहं त्यक्ष्यन्त्यतन्द्रिताः। युधि वा निहताः सम्यगपि तिर्य्यग्गता न्टप!। ते स्वर्गभाजो